## अष्टादशः पाठः

# सुभाषितानि

यथा यथा हि पुरुषः कल्याणे कुरुते मनः।
तथा तथास्य सर्वार्थाः सिद्ध्यन्ते नात्र संशयः॥1॥

ईर्ष्यी घृणी न सन्तुष्टः क्रोधनो नित्यशङ्कितः।
परभाग्योपजीवी च षडेते नित्यदुःखिताः॥ 2॥

विद्या विवादाय धनं मदाय, शक्तिः परेषां परिपीडनाय।
खलस्य साधोः विपरीतमेतत्, ज्ञानाय दानाय च रक्षणाय॥3॥

राष्ट्रं मम पिता माता प्राणाः स्वामी धनं सुखम्।
बन्धुराप्तः सखा भ्राता सर्वस्वं मे स्वराष्ट्रकम्॥4॥

यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।
यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः॥5॥

सत्यं माता पिता ज्ञानं, धर्मो भ्राता दया सखा।
शान्तिः पत्नी क्षमा पुत्रः, षडेते मम बान्धवाः॥6॥

वरमेको गुणी पुत्रो न च मूर्ख-शतान्यपि।
एकश्चन्द्रस्तमो हन्ति, न च तारागणा अपि॥7॥

अष्टादशपुराणेषु व्यासस्य वचनद्वयम्।
परोपकारः पुण्याय पापाय परपीडनम्॥8॥

### शब्दार्थाः

| | | | |
|---|---|---|---|
| ईर्ष्यी | = ईर्ष्या करने वाला | घृणी | = घृणा करने वाला |
| खलस्य | = दुष्ट का | रमन्ते | = निवास करते हैं |
| वरम् | = श्रेष्ठ | तमः | = अन्धकार |
| क्रोधनः | = क्रोधित रहने वाला | | |

## अभ्यासः

1. **एकपदेन उत्तरं लिखत–**
   - (क) कति जनाः नित्यदुःखिताः?
   - (ख) कस्य विद्या विवादाय भवति?
   - (ग) साधोः शक्तिः किमर्थं भवति?

2. **एकवाक्येन उत्तरं लिखत–**
   - (क) देवताः कुत्र रमन्ते?
   - (ख) कति पुराणानि सन्ति?
   - (ग) परोपकारः किमर्थं भवति?

3. **रिक्तस्थानानि पूरयत–**

| | | |
|---|---|---|
| (क) | ................ जनाः नित्यदुःखिताः। | (पञ्च/षड्) |
| (ख) | साधोः धनं ............ भवति। | (दानाय/मदाय) |
| (ग) | .............. पुराणेषु व्यासस्य वचनद्वयम्। | (नवदश/अष्टादश) |
| (घ) | .................. परपीडनम्। | (पुण्याय/पापाय) |
| (ङ) | परोपकारः ............. भवति। | (पापाय/पुण्याय) |

4. **श्लोकं पूरयत–**

(क) राष्ट्रं मम ...................................... सुखम्।
...............................................स्वराष्ट्रकम्॥

(ख) अष्टादश ................................................।
...................................................परपीडनम्॥

5. **विलोमपदानि मेलयत–**

| | (अ) | (ब) | | (अ) | (ब) |
|---|---|---|---|---|---|
| (क) | पुरुषः | अधर्मः | (झ) | सन्तुष्टः | माता |
| (ख) | सौभाग्यम् | अविद्या | (ञ) | दुःखम् | विद्वान् |
| (ग) | विद्या | पत्नी | (ट) | ज्ञानम् | पापम् |
| (घ) | पिता | स्त्री | (ठ) | भ्राता | दुर्भाग्यम् |
| (ङ) | धर्मः | भगिनी | (ड) | सत्यम् | अज्ञानम् |
| (च) | पतिः | असन्तुष्टः | (ढ) | पुत्रः | सुखम् |
| (छ) | मूर्खः | असत्यम् | (ण) | उपकारः | पुत्री |
| (ज) | पुण्यम् | अपकारः | | | |

## 6. कोष्ठकात् चित्वा वाक्यानि रचयत–

| | | | |
|---|---|---|---|
| एतत्, | एते, | एषा, | एषः, |
| एतानि, | एताः, | एतौ, | |

## योग्यताविस्तारः –

| लिङ्गम् | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| पुंल्लिङ्गम् | सः/एषः | तौ/एतौ | ते/एते |
| स्त्रीलिङ्गम् | सा/एषा | ते/एते | ताः/एताः |
| नपुंसकलिङ्गम् | तत्/एतत् | ते/एते | तानि/एतानि |

- **उदाहरणानुगुणम् अन्वयपूर्तिं कुरुत–**

यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।
यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः।।

**अन्वयः** यत्र नार्यः तु पूज्यन्ते, तत्र देवताः रमन्ते।
यत्र एता तु न पूज्यन्ते, तत्र सर्वाः क्रियाः अफलाः।।

(क) ............ गुणी पुत्रः वरं ............ शतानि अपि ............ च।
एकः............तमः ............ तारागणा ............ च............।

(ख) यथा यथा ............ ............ मनः कल्याणे ............।
तथा ............ अस्य सर्वार्थाः ............ अत्र ............ न।

*जलमन्नं तथा काव्यं त्रीणि रत्नानि भूतले।*